Shree Raghunath Sanskrit Research Institute Library,
Jammu

No. ७१८ : घ

Title अग्न्याधानेष्टिः

Author

Extent १६ Age १८५०

Subject सूत्रपद्धति . सम्पूर्णम्

१० पत्राणि

ब्रह्माधानेष्टिः

नं. ७१८ - ख

पत्राणि १८

ग्रायानेष्टिः १५

श्रीगणेशाय नमः॥ ॥अग्न्याधेयं व्याख्यास्यामः॥ कर्मप्रयोक्ता यजमानस्तत्त्वविदुषा कर्मप्रयोगमा
त्रतत्त्वविदुषा वा ब्राह्मणेन यजेत्सानुज्ञातः स्वभार्यया सह संशोधयेदात्मानं गायत्रीलक्षजपे
न घृतजपैर्वा न्यातरुद्रीयजप कूष्माण्डगणहोम कृच्छ्रचान्द्रायणैश्च सर्ववर्जनैर्मैत्री कृत्वा वसन्ते
शिशिरे वा कृत्तिकारोहिणीमृगशीर्षपुनर्वसुपूर्वफाल्गुन्युत्तरफाल्गुनीहस्तचित्रास्वातिविशा
खानूराधाश्रवणोत्तरप्रोष्ठपदानामन्यतरयुक्तामावास्यायां पौर्णमास्यां केवलयोर्वा बि
वलेयोक्तान्यतरनक्षत्रे ब्राह्मणोग्नीनादधीत संकल्पप्रभृत्याहवनीयाधानान्तमेकं नक्षत्रं १
तथैव पर्व गार्हपत्याधानप्रभृति वा केचित्तच्च द्वयामावास्यप्रतिपद्याधानमुपदिशन्ति पत्नी
प्रागग्न्याधानोक्तमंगिमन्त्रानधीयीत यस्मिन्नहन्यादधीत तत्सर्वदिने स्नानरौपासनं कृत्वा प

त्मासह दर्भेष्वासीनो दर्भान्धारयमाणो महागणपतिं संपूज्य परमात्मानं संस्मृत्य देशकाला
दौ संकीर्त्याग्नीनाधास्ये सर्वक्रत्वर्थं यैरस्म्यधिकृतो याःऽश्वशास्त्रे प्रयोक्तुं। अधिकृतेति
पत्नी। अग्नीनाधास्य इति वा। न विद्वत्व। अथाध्वर्युवरणं। अस्मिन्नग्न्याधानाख्ये कर्मण्य
कर्म४ ध्वर्युं त्वां वृणीमहे। अध्वर्युर्वृतोऽस्मि कं रिष्यामीत्युक्त्वा। एवं ब्रह्माणं होतारमाग्नीध्रं च वृ
त्वा। अध्वर्युः। यो अश्वत्थः शमीगर्भ आरुरोह त्वे सचा। तं ते हरामि ब्रह्मणा यज्ञियैः केतुभिः
सह। शमीगर्भस्याश्वत्थस्यारणी आहरति। अशमीगर्भस्येति वाजसनेयके। सर्वच्छिन्ने
शुष्के चतुरंगुलोच्छ्रये द्वादशांगुलविस्तीर्णे ऽरत्न्यायते षोडशांगुलायते वा ऽरणी ओप
सनसमीपे आहरत्यशमीगर्भेऽपि मन्त्रानिवृत्तिर्द्वियं वै शमी तस्या एष गर्भो यदश्वत्थ इति

2 हि विज्ञायते। एतस्मिन्काले बह्वृचो यजमानो योऽश्वत्थः शमीगर्भ आरुरोह त्वे सचा। तं त्वा
हरामि ब्रह्मणा यज्ञियैः केतुभिः सहेत्यध्वर्युणा सहाऽरणी आहरेत्। अश्वत्थाद्धव्यवाहाद्धि
जातामग्नेस्तन्वं यज्ञियां संभरामि। शांतयोनिं शमीगर्भमग्नये प्रजनयितवे। आयु
र्मयि धेह्यायुर्यजमाने। युगपदरणी अभिमन्त्र्य। सप्त पार्थिवान्संभारानाहरंति। औपा
सनदेशे। एवं वानस्पत्यान्सप्त च पंच वा द्वितीयादि पंच औदुंबराणि लोहशकलानि पंचमो
भवति न वा सर्वसंभारान्संभरेत्। वैश्वानरस्य रूपं पृथिव्यां परिस्रसा स्योनमाविशंतु नः।
सिकताः। यदिदं दिवो यददः पृथिव्याः संजग्माने रोदसी सं बभूवतुः। ऊषान्कृष्णमवतु २
कृष्णमूषा इहोभयैर्यज्ञियमागमिष्ठाः। ऊषान्। ऊतीः कुर्वाणो यत्पृथिवीमचरो गुहाकारमाखु

रूपंप्रतीत्य।तत्तेन्यंकमिहसंभरंतःशतंजीवेमशरदःसवीराः।आखुकरीषं।ऊर्जंपृ
थिव्यारसमाभरंतःशतंजीवेमशरदःपुरूचीः।वम्रीभिरनुवित्तंगुहासुश्रोत्रंतउर्व्य
बधिराभवामः।वल्मीकवपां।प्रजापतिसृष्टानांप्रजानांक्षुधोपहत्यैसुवितंनोअस्तु।
उपप्रभिन्नमिषमूर्जंप्रजाभ्यःसूदंगृहेभ्योरसमाभरामि।सूदं।यस्यरूपंबिभ्रदि
मामविंदद्गुहाप्रविष्टांसरिरस्यमध्ये।तस्येदंविहतमाभरंतोछंबट्कारमस्यांविधेम।
वराहविहतं।याभिरदृंहज्जगतःप्रतिष्ठामुर्वीमिमांविश्वजनस्यभर्त्रीं।तानःशिवाः
शर्कराःसंतुसर्वाः।शर्कराः।अग्नेरेतश्चंद्रंहिरण्यमद्भ्यःसंभूतममृतंप्रजासु।तत्संभ
रन्नुत्तरतोनिधायातिप्रयच्छंदुरितिंतरेयं।हिरण्यशकलानित्रीणिन्यस्त्रीणिवजतवा

3 कल्पानिचेतिपार्थिवान्॥ ॥अश्वोरूपंकृत्वायदश्वत्थेतिष्ठः संवत्सरंदेवेभ्योनिलाय।
तत्तेन्यक्तमिहसंभरंतः शतंजीवेमशरदः सवीराः।अश्वत्थ।ऊर्जः पृथिव्याअध्युछितो
शिववनस्पतेशतवल्शोविरोह।त्वयावयमिषमूर्जंमदंतोरायस्पोषेणसमिषामदेम।उ
दुंबरस्त्वायज्ञियाद्ध्रियमाणस्ययत्तेपर्णमपतत्तृतीयस्येदिवोधि।सोयंपर्णः सोमपर्णा
द्धिजातस्ततोहरामिसोमपीथस्यावरुध्यै।देवानांब्रह्मवादंवदतांयदुपाश्रृणोः सुश्रवा
वैश्रुतोसि।ततोमामाविशतुब्रह्मवर्चसं तत्संभरंस्त्वदवरुंधीयसाक्षात्।एताभ्यांपर्णा। ३
ययोतेसहस्रस्याग्नेहेतिमग्नामयत्प्रजापतिः।तामिमामप्रदाहायशमीं शांत्यैहराम्य
हंशमी।यत्तेसहस्रस्यपुनोविकृतंभाओछ्जातवेदः।तयाभासासंमितंउरुन्नोलोक

मनुष्वभाहि। विकङ्कतां यन्नेनां तस्य हृदयमाच्छिनन्द जातवेदो मरुतोद्भिस्समथित्वा। एत
त्तेतदशानेः सम्भरामि साम्मा अग्ने सहृदयो भवेह। अशानिहतस्य वृक्षस्य शाकला
नित्व चोवा। यस्य र्य पर्श्नयत्सरिरस्य मध्य उर्वीमपश्यञ्जगतः प्रतिष्ठां। तत्पुष्करस्याय
तनाद्धिजातं पर्णं पृथिव्याः प्रथनं हरामि। इति पुष्करपर्णमिति वानस्पत्सान्। एकस्मि
न्याग्नेत्कृती सर्वान्संभारान्संभृत्य। यं त्वा समभरं जातवेदो यथा शरीरं भूतेषु न्यक्तं।
स सम्भृतः सीद शिवः प्रजाभ्य उरुं नो लोकमनुनेषि विद्वान्। निदधाति। ततोनादीआर्द्रं।
आगूरस्यैया हरणानियत्वा आर्द्रभवेन्नांदिमुखाभिधानी। उद्धन्यमानवपनं निधानं।
ब्रह्मौदनाग्नेरशानं च पस्योः। अध्वर्युः। उद्धन्यमानमस्या अमेध्यमपपाप्मानं यजमा

५ नस्यरेतु। शिवानःसंतुप्रदिशश्चतस्रःशंनोमातापृथिवीतोकसाता। प्राचीनप्रवणेदे
वयजनमुद्धत्य। अपउपस्पृश्य। शंनोदेवीरभिष्टयआपोभवंतुपीतये। शंयोरभिस्र
वंतुनः। अद्भिरवोक्ष्य। अथवपनं। यजमानः। केशश्मश्रूवापयतेनखानिनिकृंततेस्ना
सर्वंपत्नीकेशवर्जंक्षौमेवसानौजायापतीअग्निमादधीयातां॥ क्षौमाभावेकार्पासे
पुरस्ताद्ब्रह्मौदनिकनिधानात्परिदधीयातां। पुरस्तात्संभारनिवपनाद्दक्षिणाका
लेऽध्वर्युर्वेदत्तोऽध्वर्युरपराह्णेपिदृक्षस्यर्येवौपासनाद्ग्निमाहृत्यापरेणगार्हपत्या ४
यतनंब्रह्मौदनिकमादधाति। औपासनंवासर्वंयद्यस्सर्वमादध्याद्वितीयाधानेनिर्म
थ्यः। ततोजायापत्योर्भोजनंअमाषमसमाऽऽसीं। ततःसायमौपासनेकृतेवाग्रस्मादिविरणं।

अपरेणब्रह्मौदनिकं रोहिते चर्मण्यानडुहे प्राचीनग्रीवमुत्तरलोम्नि पाजकेवानिन्नायां ब्रह्मौ
दनं चतुःशरावं निर्वपति देवस्य॰ ब्रह्मणे प्राणाय जुष्टं निर्वपामि। देव॰ ब्रह्मणे पानाय।
ब्रह्मणे व्यानाय॰। ब्रह्मणे जुष्टं॰ तूष्णीं वा सर्वाणि। अवहत्यन प्रक्षालयति चत्वार्युद्पा
त्राणि स्थाल्यामासिच्य तेषु श्रपयति न प्रस्रावयति क्षीरे भवतीत्येके। जीवतण्डुलमिव श्र
पयतीति विज्ञायते नाज्योपस्तरणाभिघारणे भवतः। उद्वास्य दर्व्या ब्रह्मौदनादुद्धृत्य प्रवे
धसे कुर्वयेमेध्यायुव चौर्व दारु व सुभायुवस्ले। यतोस्रु यमस्य युतं तेनो अस्त्व वर्देवान्यजेहे
घ्राण्स्वाहा। प्रवेधसे ब्रह्मण इदं। स्रुवुद्धरणादि याजमानं। चतुर्धा ब्रह्मौदनं व्युद्धृत्य प्रभूते
न सर्पिषोपसिच्य कर्षन्ननुच्छिन्दन्॰ श्चतुर्भ्य आर्षेयेभ्य ऋत्विग्भ्य उपाहरति। आशाना॰ प्रथमे

पिंडभर्वस्य प्रतिहताः पाप्मयो॰थाध्वर्युर्ब्रह्मौदनशेषं संकृष्य तस्मिन्नाज्यशेषमानीय
5 तस्मिंश्चित्रियस्याश्वत्थस्य ग्रामस्य तीर्थस्य विशोषणाभूतस्य स्त्रौडुम्बलस्य वा तिस्रः समि
ध आर्द्राः सपलाशाः प्रादेशमात्र्यः स्तिभिगवत्सो विवर्त्तयति। चित्रियादश्वत्थात्संभृता ह्य
हस्यः शारीरमभिसंस्कृतास्थ। प्रजापतिना यज्ञमुखेन संमितास्तिस्त्रिवृद्भिर्मिथुनाः
प्रजासे। चरुशेषे विवर्त्तयति लोडयति। अथाध्वर्युः समिध आदधाति। समिधाग्निं दुवस्य
त घृतैर्बोधयतातिथिं। आस्मिन्हव्या जुहोतन। अग्नये इदं। उपत्वाग्ने हविष्मतीर्घृताचीर्यन्तु ५
हर्यत। जुषस्व समिधो मम। अग्नये इदं। तं त्वा समिद्भिरङ्गिरो घृतेन वर्द्धयामसि। बृहच्छो
चायविष्ठ्य। अग्नये इदं। स्वाहाकारके चिन्न सामिस्तु अध्वर्यो ति स्त्रो वत्सतरीस्त्व ददामि। रुद्रीप्रतिग्रहः।

प्राश्नंतिब्राह्मणाऽऽदनं।यजमानःप्राशितवंतोब्राह्मणःसमानंवरंवोददाति।।एकां
गांददाति।तूष्णींप्रतिग्रहः।१
गौर्धेनुःपष्ठौहीवाऽवरोऽनुजामात्रंसुवर्णमितिपैंगिभ्वनुःकार्षापणोवरइत्येके।योऽस्याग्निमा
धास्यन्स्यात्सएतांरात्रिंव्रतंचरेत्।नमांसंसमश्नाति।नस्त्रियमुपैति।प्रजाअग्नेस्संवा
सयाश्वपशुभिःसहाराज्ञाएष्वस्माआधेहि।यान्यासन्सवितुःसवोउत्तरेणगार्हपत्या
यतनंकल्माषमजंबध्नाति।अथयजमानोव्रतमुपैतिवाचंयच्छति।अनृतात्सत्यमुपैमि।
मानुषाद्दैव्यमुपैमि।दैवींवाचंयच्छामि।वीणातूणवेनैनमेतांरात्रिंजागरयंति।अपिवा
नजागर्तिनवाचंयच्छति।शाल्केरेतांरात्रिमेतमग्निमिंधानआस्ते।यजमानः।शाल्कैर
ग्निमिंधानउभौलोकौसनेमहम्।उभयोर्लोकयोरृध्वातिमृत्युंतराम्यहं।जागरणपक्षे
प्रतिशाकलंमंत्रावृत्तिः।विपर्ययेसकृदेवमहांतिकाष्ठान्याधायस्वपिति।वाग्यमनाभावे

6

दैवींवाचंयच्छामीतिमंत्रोनिवर्ततेनेसेके।अध्वर्युः।तस्मिन्नुपव्युषमरणीनिष्टपति।
जातवेदोभुवनस्यरेतइहसिंचतपसोयज्जनिष्यते।अग्निमश्वत्थादधिहव्यवाहंशमी
गर्भाज्जनयन्योमयोभूः।अयंतेयोनिर्ऋत्वियोयतोजातोअरोचथाः।तंजानन्नग्नआ
रोहाथानोवर्धयारयिं।एताभ्यांतस्मिन्नग्नावरणीनिष्टप्याग्निमनुगमयति।अग्नीरक्षा
ंसिसेधतिशुक्रशोचिरमर्त्यः।शुचिःपावकईड्यः।अरणीअभिमन्त्र्यादोत्याचतेदुग्ध्याट
चौर्वरीतेतेभागधेयंप्रयच्छामि।यजमानायप्रयच्छति।यजमानः।महीविश्पत्नीसदने
ऋतस्याऽर्वाचीएतंधरुणेरयीणां।अन्तर्वत्नीजन्यंजातवेदसमध्वराणांजनयथःपुरोगां।
अरणीआह्रियमाणेयजमानःप्रतीक्षते।आरोहतंदशातंशक्वरीर्ममर्तेनाग्नआयुषा ६

वर्चसा सह। ज्योग्जीवंत उत्तरामुत्तरां॒ समां दर्शपूर्णमासौ यज्ञं यथा यजै। हस्ताभ्यां
प्रतिगृह्य। ऋत्वियवती स्थो अग्निरेतसौ गर्भं दधाथां ते वामहं ददे। तत्सत्यं यद्वीरं बिभृ
थो वीरं जनयिष्यथः। ते मत्प्रातः प्रजनिष्येथे ते मा प्रजाते प्रजनयिष्यथः। प्रजया पशु
भिर्ब्रह्मवर्चसेन सुवर्गे लोके। प्रतिगृह्याभिमंत्रयते। यजमानः। मयि गृह्णाम्यग्रे अग्निं
॒ रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय। मयि प्रजां मयि वर्चो दधाम्यरिष्टाः स्याम
तनुवा सुवीराः। यो नो अग्निः पितरो हृत्स्वंतरमर्त्यो मर्त्यां॒ आविवेश। तमात्मन्परि गृ
ह्णीमहे वयं मा सो अस्मां॒ अवहाय परागात्। इत्युक्त्वा जपतः। अपेत वीत वि च सर्पता
तो येत्र स्थ पुराणा ये च नूतनाः। अदादिदं यमोऽवसानं पृथिव्या अक्रन्निमं पितरो लोकमस्मै।

अध्वर्युः। २

7 गार्हपत्यायतनमुद्धत्यापउपस्पृश्य। शंनोदेवी॰ अद्भिरवोक्ष्य। एवं दक्षिणाग्नेराहवनी
यस्य। सभ्यावसथ्ययोश्चैवमनुप्रवर्ग्य एवं वैतऊर्ध्वं कर्माणि क्रियन्ते। सिकतानामर्धं
द्वैधं विभज्य। अर्धं गार्हपत्यायतने निवपति। अर्धं दक्षिणाग्नेरवशिष्टं सर्वमाहवनी
यस्य। पूर्वं चिते नैव कल्पेन सर्वान्यार्थिकान्निवपति। अग्नेर्भस्मास्यग्नेः पुरीषमसि। सि
कतानिवपति। संज्ञानमसि कामधरणं मयि ते कामधरणं भूयात्। ऊषान्सिकतावन्नि
वपति। यदस्थ्वुं इमसि कृष्णं तदिहास्तु। मनसाध्यायति। उदेत्यग्ने अधिमातुः पृथिव्या ७
विश्वाभ्यो विशामहतः सधस्थान्। आस्तुत्वायोदधिरे देवयन्तो हव्यवाहं भुवनस्य गोपां।
आखुकरीषं। यत्पृथिव्या अनामतं संबभूव त्वे सचा। तदग्निरग्नये ददात्तस्मिन्नाधी

यं नामृयं। गार्हपत्यायतनेवल्मीकवपां निवपति। यदन्तरिक्षस्या नामृतंꣳ सं बभूवते
सचा। तदं मयि। दक्षिणाग्नौ। यद्दिवोनामृतंꣳसं मयि। आहवनीयस्य। उत्समुद्रान्म
धुमाꣳऊर्मिरागात्साम्राज्याय प्रतरं दधानः। अमी चयेमघवानो वयञ्चेषमूर्जं मधु
मत्संभरेम। इति स्रुदं। इयत्यग्र आसीः। इति वराहविहतं। अहोदेवी प्रथमाना पृथग्य
द्देवैर्न्युप्ता व्यसर्पो महित्वा। अदंꣳहथाः शर्कराभिस्त्रिविष्टप्यजयो लोकान्प्रदिशश्च
तस्रः। पाप्मनः। इति शर्कराः। द्वेधं च मनसाध्यायति। ऋतꣳस्तृणामि पुरीषं पृथिव्या
मृतेध्यग्निमादधे सत्येध्यग्निमादधे। इति गार्हपत्याद्यायतनेषु संभाराननुव्यूहति नि
वपनक्रमेण व्यूहनं। संयावः प्रियास्तन्वः संप्रिया हृदयानि वः। आत्मा वो अस्तु संप्रि

8 याहृदयानिवः। आत्मा वो अस्तु संप्रियः संप्रियास्तनुवो मम। संवः सृजामि हृदयानि
संऽसृष्टं मनो अस्तु वः संऽसृष्टः प्राणो अस्तु वइसे ताभ्यांनानस्यत्यान्सऽसृज्यसि
कृतावर्ह्निभज्य। इतः प्रथमं जज्ञे अग्निः स्वाद्योनेरधिजातवेदाः। सगायत्र्यात्रिष्टु
भाजगत्यादेवेभ्यो हव्यंवहतु प्रजानन्। यथाक्रमंनिवपति। पंचसंभारपक्षेतुतान्मं
यास्ते शिवास्तथा। अभिमंत्र स्त्वमंत्रेण यथारण्यः पश्चिमेनतदा। यास्ते शिवास्तन्वो जात
वेदो या अंतरिक्षे दिवियाः पृथिव्यां। ताभिः संभूय सगणः सजोषा हिरण्ययोनिर्वह ८
व्यमग्ने। गार्हपत्यायतने सौवर्णं हिरण्यं वा कल्कमुत्तरतः संभारेषूपास्यति। चंद्रमग्निं
चंद्ररथंहरित्वचं वैश्वानरमप्सुषदं सुवर्विदं। विगाहं तूर्णिं तविषीभिरावृतं भूर्णिं देवास इह सुश्रियं दधुः।

उपास्तमभिमंत्रयते द्वेष्यायरजतं प्रयच्छति । द्वेष्यानधिगमे द्वेष्यदिशि निरस्यापउपस्पृश्य ।
एवमितरयोरुपासनान्यभिमंत्रणनिरसनानि करोति । पञ्चसंभारपक्षे यास्ते शिवा इति ता
न्यत्राकुलमुपास्य तूष्णीमभिमंत्रयते । असंभारपक्षउद्धृत्यावोक्ष्य भस्मापोह्य हन्मेव । अ
ध्वर्युः ध्वालौदनिकाद्भस्मापोह्य तस्मिं छमीगर्भादग्निं मंथति । उद्यतस्तु रश्मिषु द्वाहोता
रणीसमवदधाति । चित्तिः स्रुक् सामाध्वर्युः इत्यन्तरारणी प्राङ्मुखीसंदधाति । उपतिष्ठत्य
श्वेऽग्निं मंथति श्वेनो॰ विकिलुआक्षो यस्मिन्नस्मिंश्चिदपिवासाँउष्ठे समीपगते । सहाग्नेऽग्नि
नाजायस्व सहरय्या सहपुष्ट्या सहप्रजया सहपशुभिः सहब्रह्मवर्चसेन । उपतिष्ठत्यग्निं
मंथति बलवति जाते । उपावरोह जातवेदः पुनस्त्वं देवेभ्यो हव्यं वह नः प्रजानन् । आयुः प्रजां रयि
मस्मासु धेह्यजस्रो दीदिहि नो दुरोणे । निर्वर्त्यमानमभिमंत्रयतेऽध्वर्युर्यजमानश्च । निर्वर्त्यमानजप

लोपेग्निर्लौकिकः। अत्र चतुर्होतृन्यजमानं वाचयति। वाचनं नियतं यद्धर्विंदु यो पि विधेर्बलात्।
विज्ञिस्मृकः॰ साम्नाध्वर्युः। पृथिवी होता॰ बृहस्पतिरुपवक्ता। अग्निर्होता॰ मित्र उपवक्ता। सूर्यं
ते चक्षुः। वातं प्राणः। द्यां पृष्ठं। अन्तरिक्षमात्मा। अंगैर्यज्ञं। पृथिवीं शरीरैः। महाहविर्होता॰ अ
यास्य उद्गाता। अध्वर्युः। अजनन्नग्निः पूर्वः पूर्वेभ्यः पवमानः शुचिः पावक ईड्यः। जातमभिम
न्त्रयते। जाते यजमानो वरं ददाति। अध्वर्यो वरं ते ददामि। तूष्णीं प्रतिग्रहः। प्रजापतेस्त्वा प्राणे
नाभि प्राणिमि पूष्णः पोषेण मह्यं। दीर्घायुत्वाय शतशारदाय। शतं शरद्भ्य आयुषे वर्च
से। जीवात्वै पुण्याय। जातं यजमानोभिप्राणिति उपर्युच्छ्वासं करोति। अध्वर्युः। अजीजनन्न
मृतं मर्त्यासो स्रेमाणं तरणिं वीडुजंभं। दश स्वसारो अग्रुवः समीचीः पुमांसं जातमभिसं
रभंतां। जातमंजलिनाभिगृह्याम् सम्राडसि विराडसि सारस्वतौ त्वोत्सौ समिंधातामन्नाद

तान्नेपस्साय। इत्युपसमिध्य। अस्मिन्काले क्षौममेव सानौ जायापती अग्निमादधीयातां नेद
क्षिणाकाले अध्वर्यवे दद्यात्। इतः प्रभृत्यध्वर्युमन्वारभ्यासाते यजमानः पत्नी च। आयतनीया
धानपर्यंतं संनिधिमात्रं वा। अथैनं प्राञ्चमुदङ्मुखमासीनः सर्वेषां मन्त्राणां मंते रथंतरे गीयमा
ने यज्ञायज्ञीये च यथर्क्प्राधानेन। प्रथमया व्याहृत्या द्वाभ्यां वा प्रथमाभ्यां च सर्पराज्ञीभि
प्रथमेन घर्मशिरसा नक्तं गार्हपत्यमादधाति। भृगूणां त्वा देवानां व्रतपते व्रतेनादधामि। इति भृ
गूणां। अंगिरसां त्वा॰ इत्यंगिरसां। आदित्यानां त्वा॰ इत्यन्यासां। भूर्भुवः। भूमिर्भूम्ना द्यौर्वरि
णांतरिक्षं महित्वा। उपस्थे ते देव्यदितेग्निमन्नादमन्नाद्यायादधे। आयं गौः पृश्निरक्रमीदसद
न्मातरं पुनः। पितरं च प्रयन्त्स्वः। घर्मः शिरस्तदयमग्निः संप्रियः पशुभिर्भुवत्। छर्दिस्तोकाय
तनयाय यच्छ। यास्ते शिवास्तनुवो जातवेदो या अंतरिक्ष उत पार्थिवीर्याः। ताभिः संभूय सगणः

10

निदधाति

सजोषाहिरण्ययो निर्वहन्हव्यमग्ने। प्राणंत्वामृतआदधाम्यन्नादमन्नाद्यायगोप्तारंगुप्त्यै। दि
वस्त्वावीर्येणपृथिव्यैमहिम्ना। अंतरिक्षस्यपोषेणपशूनांतेजसासर्वपशुमादधे। अग्नेगृ
हपतेहेबुध्न्यपरिषद्यदिवः पृथिव्याः पर्यंतरिक्षाल्लोकंविंदयजमानाय पृथिव्यास्त्वामू
र्धन्सादयामि। यज्ञियेलोकेयोनो अग्नेनिष्ट्योयोनिष्ट्योभिदासन्नीदमहंतंत्वयाभिनिदधा
मि। संभारेषुगार्हपत्यं। यजमानः भूर्भूमिरितियजमानोप्यनुवर्तयते। सुगार्हपत्योविदह
न्नरातीरुषसः श्रेयसीः श्रेयसीर्दधत्। अग्नेसपत्नाँ अपबाधमानोरायस्पोषमिषमूर्जम
स्मासुधेहि। आह्रीयमानमभिमंत्रयते यजमानः। घर्मःशिरांसचैनमध्वर्युर्वाचयति। घ
र्मःशिरस्तदयमग्निः संप्रियः पशुभिर्भुवत्। छर्दिस्तोकायतनयाययच्छ। वातःप्राणस्तदयम
ग्निः सं०। स्वर्दिस्तोकायतनयायपिन्वंपचा। अर्कश्चक्षुस्तदसौसूर्यस्तदयमग्निः सं०। यत्तेशुक्र १०

शुक्रवर्चाः शुक्रा तनूः। शुक्रं ज्योतिरजस्रं। तेन मे दीदिहि तेन त्वादधे। अग्निनाग्ने ब्रह्मणा। आहि
तमनभिक्रूतमग्निमुपस्पर्शयति। अध्वर्युः सवैधिधीराज्यमिश्राः कृत्वा स्रुचा प्रक्षिप्य। याते
अग्ने पवमाना प्रियातनूर्या पृथिव्यां याग्नौ या रथन्तरे या गायत्रे छन्दसि तां त एतेना
वयजे स्वाहा। अग्नेः पवमानाय प्रियायै तन्वा इदं। याते अग्ने पावका प्रियातनूर्यान्तरिक्षे या वा
यौ या वामदेव्ये या त्रैष्टुभे छन्दसि तां त एतेनावयजे स्वाहा। अग्नेः पावकाय प्रियायै तन्वा इदं।
याते अग्ने सूर्ये शुचिः प्रियातनूर्या दिवि यादित्ये या बृहति या जागते छन्दसि तां त एतेनावय
जे स्वाहा। अग्नेः शुचये प्रियायै तन्वा इदं। एतैः प्रतिमन्त्रं जुहोति। समिध आदधाति। सेके। अ
र्धोदिते सूर्य आहवनीयमादधाति। उदिते ब्रह्मवर्चसकामस्य गार्हपत्यात्प्रणयनीयमाश्वत्थ
मिध्ममादीपयति सिकताश्चोपयमनीरुपकल्पयनेनमुद्यच्छति। ॐ जसेवलाय तोयुक्ते देष

णे शुष्मायाप्सुवेव र्चसे। सपत्नतूरसि वृत्रतूः। यस्ते देवेषु महिमा सुवर्गः। यस्त आत्मा पशुषु प्रवि
ष्टः। पुष्टिर्या ते मनुष्येषु पप्रथे। तया नो अग्ने जुषमाण एहि। दिवः पृथिव्याः पर्यन्तरिक्षाद्वातात्पशु
भ्यो अध्योषधीभ्यः। यत्र यत्र जातवेदः संबभूथ। ततो नो अग्ने जुषमाण एहि। उदु त्वा विश्वे देवा
अग्ने भरन्तु चित्तिभिः। स नो भव शिवतमः सुप्रतीको विभावसुः। उपरी वाग्निमुद्यच्छति। उद्यत
मुपयतं धारयति। अथाश्वस्य दक्षिणे कर्णे यजमानमग्निमन्वाचयति॥ या वाजिन्नग्नेः पशु
षु पवमाना प्रिया तनूस्तामावह। या वाजिन्नग्नेरप्सु पावका प्रिया तनूस्तामावह। या वाजिन्नग्नेः
सूर्ये शुचिः प्रिया तनूस्तामावह। धारयत्येवाग्निं। अथाग्नीध्रो लौकिकमग्निमाहृत्य मथितं वा
गार्हपत्याद्वोर्ध्वस्तु रासीनो यजमानपत्न्यन्वारब्धो दक्षिणमग्निमादधाति। यो निरुक्तो दक्षिणाग्निः ११ स्यात्
गार्हपत्यस्तथैव च। यत्रैषाग्निविधानं स्याल्लौकिको वा यथाविधि। यज्ञायज्ञीयं गीयमाने यथर्षाधा

नेनद्वितीययाव्याहृत्या तिसृभिः सर्पराज्ञीभिर्द्वितीयेन च घर्मशिरसा। आग्नीध्रः। आदित्या

नांत्वा०धामिभ्रुवः। भूमिर्भूम्नाद्यौर्वरिम्णांतरिक्षं महित्वा। उपस्थे ते देव्यदितेग्निमन्नादमन्ना

द्यायादधे। आयंगौः० भुवः। त्रिंशद्धाम विराजति वाक्पतंगाय शिश्रिये। प्रत्यस्य वह द्युभिः।

यात्तः प्राणस्त्वदयमग्निः संप्रियः पशुभिर्भुवद्। छर्दिस्तोकायतनयायप्रितुप च। यास्ते शिवाः०

हव्यमग्ने। ध्यानं त्वामृत आदधामि। अन्नादमन्नाद्याय। गोप्तारं गुप्त्यै। दिवस्त्वा वीर्येण पृथि

व्यै महिम्नांतरिक्षस्य पोषेण पशूनां तेजसा सर्वपशुमादधे। अग्नेन्नपामयोभुवसुश्रेयदि

वः पृथिव्याः० दधामि। संभारेषु निदधाति। याते अग्ने इति पूर्ववच्छमनहोमः। आग्नीध्रो जुहो

ति। वामदेव्यमत्ति गायत आहवनीय उद्ध्रियमाणे। अध्वर्युः प्राचीमनु प्रदिशं प्रेहि विद्वा

नग्नेरग्ने पुरो अग्निर्भवेह। विश्वा आशा दीद्यानो विभाह्यूर्जं नो धेहि द्विपदे चतुष्पदे। दिवः

मस्त्व महांऽअसि वेदिषन्मानुषेभ्यः। त्रिषु लोकेषु जागृहि प्रजया च धनेन च। इमा उ मामुपतिष्ठन्तु
रायः। आभिः प्रजाभिरिह संवसेय। इहो इडा तिष्ठतु विश्वरूपी मध्ये वसोर्दीदिहि जातवेदः। प्राचो
श्वप्रथमा यजमानपत्न्य धुर्यवोऽभिप्रव्रजंति। दक्षिणतो ब्रह्मा रथंऽरथचक्रं वावर्त्तयति यावत्
चक्रं त्रिः परिवर्त्तते जानुदघ्नं धारयमाणः तृतीयमध्वनोऽग्निंऽहरति नाभिदघ्नं द्वितीयमास्यदघ्नं
तृतीयं न.कर्णदघ्नमस्फुरु हला ति। दक्षिणतः परिगृह्य हरति। अर्धाध्वे यजमानो वरं ददाति। अ
ध्वर्यो वरं ते ददामि। तूष्णीं प्रतिग्रहः। अर्धाध्वे हिरण्यं निधाय। नाकोऽसि ब्रध्नः प्रतिष्ठा संक्रमणः।
अतिक्रामति। आहवनीयदेशं प्राप्य। अभ्यस्थाद्विश्वाः पृतना अरातीस्तदग्निराह तदु सोम १२
आह। बृहस्पतिः सविता तन्म आह पूषा माधात् सुकृतस्य लोके। प्राञ्चमश्वं दक्षिणेन पदोत्तर
तः सीभारानाक्रमयति। यथाहितस्याग्नेरंगाराः पदमभ्यवनयेरन्निस्यश्वं प्रदक्षिणमावर्त्तयित्वा।

यदक्रंदः प्रथमंजायमानउद्यन्त्समुद्रादुतवापुरीषात्। श्येनस्यपक्षाहरिणस्यबाहूउपस्तुत्यंज
निमतत्तेअर्वन्। पुनरेवाक्रमयतिपुरस्तात्सर्वमश्वंधारयति। यद्वाक्रमउल्मुपद्आदधाति। अ
५७३ थयमानःशिवाजपति। येतेअग्नेशिवेतनुवौ। विराट्चस्वराट्च। तेमाविशतांतेमाजिन्वतां। येतेअ
ग्नेशिवेतनुवौ। सम्राट्चाभिभूश्च। तेमावि॰ येतेअग्ने॰। विभूश्चपरिभूश्च। तेमावि॰ येतेअग्ने॰।
प्रभ्वीचप्रभूतिश्च। तेमावि॰। यास्तेअग्नेशिवास्तनुवः। ताभिस्त्वादधे। यास्तेअग्नेघोरास्तनुवः।
ताभिःपाप्मानंगच्छ। यास्तेअग्नेघोरास्तनुवः। क्षुच्चतृष्णाच। अस्तुक्चानाहुतिश्च। अशनन
याचपिपासाचासेदिश्चामतिश्च। एतास्तेअग्नेघोरास्तनुवः। ताभिःपाप्मानंगच्छयोस्मान्द्वेष्टिय
चवयंद्विष्मः। स्निक्चस्नीहितिश्चस्निहितिश्च। उष्णाचशीताच। उग्राचभीमाच। सदाम्नीसेदि
निरा। एतास्तेअग्नेघोरास्तनुवः। ताभिःपाप्मानंगच्छयोस्मान्द्वेष्टियंचवयंद्विष्मः। ताभिर्वैनंपरा

13 भावयति। अरण्येनुवाक्या भवति। अध्वर्युः। यदिदं दिवो यददः पृथिव्याः संविदाने रोदसी सं
बभूवतुः। तयोः पृष्ठे सीदतु जातवेदाः शंभूः प्रजाभ्यस्तनुवे स्योनः। अग्निमभिमंथ्य। पुरस्ता
त्स्वयम्भुवः स्वस्तिष्ठन्नाहवनीयमादधाति। बृहस्पतियज्ञायज्ञीये गीयमाने च। अन्वारभ्यो य
जमानः पत्न्योः। आदित्यानां त्वा०। भूर्भुवः स्वः। भूमिर्भूम्ना०। आयं गौः०। त्रिंशद्धाम०। अस्य
प्राणादपानत्यंतश्चरति रोचना। व्यख्यन्महिषः स्वः। अर्कश्चक्षुस्तदसौ सूर्यस्तदयमग्निः
संधिपः प्रभुभिर्भुवन्। यन्मे शुक्रस्य शुक्रे वर्चः शुक्रातनूः। शुक्रं ज्योतिरजस्रं तेन मे दीदिहि तेन त्वा
दधे। अग्निनाग्ने ब्रह्मणा। यास्ते शिवाः०मये। अपानं त्वा० दधे। अग्ने सम्राडजैकपादाहवनी १३
य दिवः०दधामि। संभारेषु निदधाति। यजमानः। आनन्दो व्यानन्दो सर्वमायुर्व्यानन्दो। अह
त्वदस्मि मदसि त्वमेतन्ममासि योनिस्तव योनिरस्मि। ममैव सन्वह हव्यान्यग्ने पुत्रः पित्रेलोकृ

कं॰ जातवेदः। आधीयमानमभिमन्त्रयते। व्याहृतीः सर्पराज्ञीघर्मशिरा॰ सीति सर्वेष्वाधा
नेषु यजमानोऽनुवर्तयते येन येनादधाति नाहितमग्निमनभिहुतमुपस्थाप्यासान्येनौषधीभि
श्चन्नामयितव्यः। यातेअग्नइतिसर्वत्रछमनहोमः। तिस्रस्तिस्र आश्वत्थ समिध एकैक
स्मिन्नादधाति। आहवनीये वा तिस्रः। अग्न आयूंषि पवस आसुवोर्जमिषं च नः। आरे बा
धस्व दुच्छुनां। अग्नये पवमानायेदं। अग्निरृषिः पवमानः पांचजन्यः पुरोहितः। तमीमहे
महागयं। अग्नये पवमानायेदं। अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यं। दधत्पोषं रयिं मयि।
अग्नये पवमानायेदं। गार्हपत्याद्दिक्षु त्रामीमथ्यो घृतान्विताः तिस्रस्तिस्रः समिध एकैक
स्मिन्नादधाति। समुद्रादूर्मिर्मधुमां॰ उदारदुपां॰शुना सममृतत्वमानट्। घृतस्य नाम गुह्यं
यदस्ति जिह्वा देवानाममृतस्य नाभिः। आदित्यात्मनेब्रह्मणइदं। वयं नाम प्रब्रवामा घृतेनो

14 स्मिन्युंजे धारयामा नमोभिः। उप ब्रह्माश्रृणवच्छस्यमानं चतुःश्रृंगोवमीद्गौरएतत्। यज्ञात्मने
ब्रह्मण इदं। चत्वारिश्रृंगा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य। त्रिधाबद्धो वृषभो रोरवी
ति महो देवो मर्त्यां२ आ विवेश। यज्ञात्मने ब्रह्मण इदं। एवं दक्षिणाग्नावाहवनीये। एवं नाना वृक्षी
याः। प्रेद्धो अग्ने दीदिहि पुरो नोजस्रया सूर्म्या यविष्ठ। त्वां२ शश्वंत उपयंति वाजाः। इत्यौदुंबरीं२
समिधमादधाति। अग्नय इदं। विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे सधस्थे। यस्माद्यो
नेरुदारिथा यजे तं प्रत्वे हवींषि जुहुरे समिद्धे। वैकंकती। अग्नय इदं। तां२ सवितुर्वरेण्यस्य चि
त्रामाहं वृणे सुमतिं विश्वजन्यां। यामस्य कण्वो अदुहत्प्रपीनां२ सहस्रधारां पयसा महीं गां। १४
शमीमयी। सवित्र इदं। ततस्तूष्णीमग्निहोत्रं जुहोति। द्वादशगृहीतेन स्रुचं पूरयित्वा प्रजा
पतिं मनसा ध्यायन् अपि जुहोति। साग्निहोत्रस्य स्थाने भवति। प्रजापतय इदं। अथ यजमानो घो
राजपति।

यास्तेअग्ने घोरास्तनुवस्ताभिः पाप्मानं गच्छ । यास्ते अ॰ हिंस्रः । अध्वर्युर्दर्भद्वयाग्रहीतेनस्रु
वं स्तरयित्वा । सप्त ते अग्ने समिधः सप्त जिह्वाः सप्त ऋषयः सप्त धाम प्रियाणि । सप्त होत्राः स
प्तधा त्वा यजन्ति सप्त योनीरापृणस्वा घृतेन स्वाहा । सप्तमाहुतिं जुहोति । अग्नये सप्तवत
इदं । अग्ने नयेर्विरतेर्ददामि । तूष्णीं प्रतिग्रहः । अथ यजमानः शिवाजपति । ये ते अग्न इत्यादि
ताभिस्त्वा दध इत्यंतं शिवाजपांतं कृत्वा । यद्यग्न्याधेये सूर्यो नाविःस्यात् । उद्वयं उदुत्यं
चित्रमिति तिस्र आहुतीर्जुहोति । सूर्याय त्यागः । अस्मिन्प्रकृते कर्मणि ज्ञाताज्ञातकृत
दोषनिर्हरणार्थं अनाज्ञातत्रयकर्मांतरिते कर्मविपर्यासप्रायश्चित्तार्थं त्वं नो अग्ने स
त्वं नो अग्न इत्येताभ्यां व्याहृतिभिर्विहृताभिः समस्ताभिश्च कृत्वा यजुरो यज्ञस्त्वेषप्रा
यश्चित्तं कर्मिष्ठा । ध्रुवः स्वाहेति दक्षिणाग्नौ । वायव इदं । सर्वतो॰ ष्या । भूर्भुवः॰ आहवनीये प्रजा ।

15

जुह्वा सकृद्गृहीत्वा। येअग्नयोदिवोयेपृथिव्याःसमागच्छंतीषमूर्जंदुहानाः।तेअस्मा
अग्नयोद्रविणंदत्वेहाःप्रीताआकूतिभागोभूत्वायथालोकंपुनस्तैरपरेतस्वाहा।अग्नि
ष्यइदं।अथविराड्क्रमैर्यजमानउपतिष्ठते।अथर्वपितुर्मेगोपायान्नंप्राणेनसंमितं।
त्वयागुप्ताइषमूर्जंमदंतोरायस्पोषेणसमिषामदेम।अन्वाहार्यपचनं।नर्यप्रजांमे
गोपायमृतंलोकस्यसंततिं।आसनोहृदयांनिर्मितांतांपरिददाम्यहं।गार्हपत्यं।शं ते
सस्यपशून्मेगोपायविश्वरूपंधनंवसु।गृहाणांपुष्टिमानंदंतांस्तेपरिददाम्यहं।आ
हवनीयं।पुंचधाग्नीन्व्यक्रामहिराट्सृष्टाप्रजापतेः।ऊर्ध्वारोहद्रोहिणीयोनिरग्नेः १५
प्रतिष्ठितिः।सर्वाननुपतिष्ठते।त्रिष्टुप्पंक्तिमंत्रः।यद्यसोमसर्वमिष्टर्वाधानंभवति।तत्र
अग्नयेपवमानायस्वाहा।अग्नयेपावकायस्वाहा।अग्नयेशुचयेस्वाहा।इतिस्वैतेआकू

तीईृत्वा संकल्पादि प्रथमाधाने चैतन्त्र ॥ इति न द्वितीयाधाने सोमपूर्वाधाने। सोमदेवताप्रयो
न होमः। इष्टेर्द्वित्वं तथाग्नित्वं एकत्वं स्वयमुक्तवान्। बहूनां तथैव स्याद्वैकल्प्यत्वन्यस्त्रि
णो। अथाग्नेयस्याष्टाकपालस्य तंत्रं प्रक्रमयति। दर्भेष्वासीनो दर्भान्धारयमाणः पत्न्यास
हप्राणानायम्य अग्निं पवमानमग्निं पावकमग्निं शुचिमिति त्र्याग्नी अदितिं च आग्नेयेन
मानतंत्रं कुर्वन्निष्ट्यायक्ष्ये। कुर्वन्नितिपत्नी। विष्णू दसि। अध्वर्युः देवा गातुविद इत्यादि। अ
घ्यस्यायाः पंचदशी प्रथमा द्वितीयामित्यादि। ऐ [illegible] हविः। पौर्णमासे तंत्रं। ततस्त्वान्नयो
विंशतिधा। बर्हिरादत्य व्रतप्रवेशाः। समद [illegible] भ्यन्यः। यस्यकस्यचित्काष्ठस्योपवे
षः। अलंकृत्य परिस्तरणं। देवादेवेषु पात्रप्रयेः [illegible] कालेत्रि [illegible]। वत्साविंशत्याल्पानि। चरु

स्थालीस्फ्यश्च द्वंद्वं। अन्वाहार्यस्थालीवर्जमितराणि प्रकृतिवत्। निर्वपणकाले। देव॰ अग्न
16 ये जुष्टं॰ अग्नये पवमानाय जु॰ अग्नये पावकाय जु॰ अग्नये शुचये जु॰ इंद्राग्निभ्यां जु॰
अदित्यै जु॰॥ आसादनकाले। अग्ने हव्यꣳ रक्षस्वाग्ने पवमान हव्यꣳ रक्षस्वाग्ने पावक ह
व्यꣳ रक्षस्वाग्ने शुचे हव्यꣳ रक्षस्वेंद्राग्नी हव्यꣳ रक्षेथामदिते ह॰ रक्षस्व। सम्भृतायामित्या
दिप्रोक्षितास्थेयं तत्कृत्वा। यजमानः। कल्पेतां द्यावापृथिवी कल्पंतामाप ओषधीः। क १६
ल्पंतामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः। येग्नयः समनसोंतरा द्यावापृथिवी। वास
न्तिकावृतू अभिकल्पमाना इंद्रमिव देवा अभिसंविशंतु शैशिरावृतू इत्यादि यथर्तुना
मग्रहणं। आहवनीयमुपतिष्ठते। अध्वर्युः। ब्रह्मन्प्रोक्षिष्यामीत्यादि॰ देव॰ अग्नये जुष्टं प्रोक्षा

अग्नये पवमानाय वो जु॰ अग्नये पावकाय वो जुष्टं॰ अग्नये शुचये वो जु॰ मीं द्राग्निभ्यां
वो जु॰ अदित्यै वो जुष्टं प्रोक्षामि। सकृन्मन्त्रेण द्विस्तूष्णीं। उत्तानानि पात्राणि सादिम
क्षाल्य तण्डुलान्। यथाभागं व्यावर्तध्वं। इति विभज्य। इदमग्नेरग्नेः पवमानस्याग्नेः
पावकस्याग्नेः शुचेरिंद्राग्न्योः। पुरोडाशार्थान्। इदमदित्याः इति चरवर्थान्। कृष्णाजि
नादानादि अग्नये जुष्टमधिवपाम्यग्नये पवमानाय जुष्टमधिवपाम्यग्नये पावकाय
जुष्टमधिवपाम्यग्नये शुचये जुष्टमधिवपामीन्द्राग्निभ्यां जुष्टमधिवपामि धान्यमसि
आग्नेयवत्। पवमान पावक शुचिः। ऐंद्राग्न कपालानि अष्टावुपधाय तूष्णीं त्रीणि
ध्रुवोसि पृथिवीं दृंहेति चरुस्थालीमुपदधाति। पिष्टान्युत्सृज्य तण्डुलानुत्पुनाति।

17

देवस्त्वा सविलोत्पुनात्विति घृतमुत्पूय आपश्चोत्पूय स्थाल्यामासिंचति। उदक
वर्त्यां स्थाल्यां घृतमासिंचेदिति। मखस्य शिरोसीति पिंडं कृत्वा यथा देवतं विभज्य।
यथाभागं व्यावर्तेथामिति त्रिः। यथाभागं व्यावर्तेथामिति सकृत्। इदमग्नेः ध्रु
वेः। इदमिंद्राग्न्योः। इति निर्देशः। अधिश्रपणकाले पुरोडाशानधिश्रित्य घर्मो
सीति तं उल्लानावपति। प्रथनादि पुरोडाशस्य। अंतरितमिति सर्वेषां तंत्रेण। आ
पलेपं निर्वाय। देवस्य त्वेत्यादि वेदिकरणादि। उद्वासनकाले चतुर्णां पुरोडाशा १७
नां मंत्रेणाभिघारणं। तूष्णीमैंद्राग्नं। मंत्रेण चरुं। प्रियेणेत्यासादनं। यज्ञोसी
ति पंच। अयं यज्ञः। यो नः कनीय इतींद्राग्नी। ममाग्नेवर्चो होता। प्रचरणकाले।

प्रियेण नाम्ना प्रियं सद आसीद॥

प्रकृतिवदाग्नेयं प्रचर्य। एवमग्नयेपवमानायाग्नयेपावकायाग्नयेशुचये। अ
ग्नयेपवमानायेदं। अग्नेः पवमानस्याहं देवयज्ययान्नादः। अग्नयेपावका
येदं। अग्नेः पावकस्याहं। अन्नादः। अग्नयेशुचयइदं। अग्नेः शुचेरहं। अन्नादः।
प्रकृतिवदैन्द्राग्नस्य। अदित्याअ ब्रूहि। अदितिंयज। अदित्याइदं। अदित्याअ
हं देवयज्यया प्रप्रजया च पशुभिश्च जनिषीय। स्विष्टकृदादि प्रकृतिवत्।
ऐन्द्राग्नवर्जं विरूज्य प्राशित्रं एषामेव चतुर्धाकरणं मादित्यवर्जं। एतस्मिन्का
ले आदित्यं चरुं ब्रह्मणेपरिहरति। तं चत्वार आर्षेया प्राश्नीति। प्राशितवंतः
समानं वरं गोददामि। अग्नीत्। अजं सर्णपात्रमुपबर्हं णमासांर्वस्त्रं तेददामि।

18 ब्रह्मन्वहिनमश्वंतेददामि।होतर्धेनुंतेददामि।अध्वर्योअनड्वाहंतेददामि।
ब्राह्मणाःवासोमिथुनौगावौनवंचरथंगांचवोददामि।तूष्णींप्रतिग्रहः।
यघनाद्योग्नीमादधीता।एकांगांदद्यात्।एतस्मिन्कालेक्षौमेवाससीअ
ध्वर्यवेदत्तः।हविःशेषोद्वासनादिप्रतिपद्यते।स्रुक्स्रुवाके आज्यभागांते
अग्नयइद्दं।अग्नेरहमुज्जि॰अग्नेःपवमानस्याहमुज्जि॰अग्नेःपावकस्या
हमुज्जि॰अग्नेःशुचेरहमुज्जि॰इंद्रा॰अदित्याअहमु॰देवेभ्यआ॰अग्नेःस्वि १८
ष्टकृतोहमुज्जि॰एमाअग्मन्नित्यादिसर्वंप्रकृतिवत्।यज्ञोबभूवयतद्वी

चमसवर्जं ब्राह्मणतर्पणांतं प्रकृतिवत्॥ ॥इत्याधानेष्टिः॥ ॥आधानप्रयोगः
समाप्तः॥ ॥संवत् १७५० सुभानुसंवत्सरे माघशुद्ध १५ मंदवासरे काव्हेबाउवी
रेभ्वभट्टात्मजयादवेन लिखितं॥ ॥०॥ ॥श्री॥ ॥०॥ ॥श्री॥ ॥०॥

19

ग्रहशान्तिः ॥ १५